स्तथा। तत्सुतो गौतजोबन्धुः शिष्यः सब्रह्मचारिणः" या० वचने बन्धुपदेन एतेषामात्मबन्धूनां पितृमातृबन्धूनाञ्च ग्रहणम्। आत्मबान्धवादयोऽप्यत्र। ४आत्मनि च "आत्मैव ह्यात्मनोबन्धुरात्मैव रिपुरात्मनः" इत्युक्तेरात्मन एव आत्मोपकारज्ञानसाधनत्वेन बन्धुत्वात्तथात्वम्।

**आत्मभू** पु० आत्मनोमनसो देहात् वा भवति भू—क्विप् ५त०। मनोभवे १कामे देहभवे २पुत्रे ३कन्यायां ४बुद्धौ च स्त्री। आत्मनैव भवति भू—क्विप्। ५ईश्वरे पु० स हि "बहु स्यां प्रजायेयेति" ईक्षणपूर्ब्बकं सृज्यवस्त्वाकारेण विवर्त्तनात् तथा। "सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः" रघुः "आत्मभूरवरजाखिलप्रजः" इति माघः ६शिवे ७विष्णौ च परमेश्वराभेदात्तयोस्तथात्वम्। आत्मनः ब्रह्मणः भवति भू—क्विप्। आदिजीवे ८हिरण्यगर्भे "यो वै ब्राह्मणं विदधाति पूर्ब्बम्" इति श्रुत्या "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतत् ब्रह्म नाम रूपमन्नञ्च जायते इति" श्रुत्या च चतुर्मुखस्यात्मजन्यत्वोक्तेस्तस्य तथात्वम् ब्रह्मेति क्लीवं छान्दसम् "यमामनन्त्यात्मभुवोऽपि कारणम्" "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा० अच् आत्मनो भवति भू+अच् ५त०। आत्मभवादयोऽप्युक्तार्थेषु।

**आत्मभूत** त्रि०आत्मनोदेहात् मनसो वा भूतः। तज्जे १पुत्रे मनोभवे २कामे च। ३कन्यायां ४बुद्धौ च स्त्री ५मनोजन्यमात्रे त्रि०। अनात्मा आत्मा भूतः श्रेण्या०कर्म्म०। अनात्मनि आत्मरूपेण भवितरि ६देहादौ त्रि० "आत्मभूतानीन्द्रियाणीति शा० भा०। ७अनुकूले सेवकभेदे च। "तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः" मनुः।

**आत्मभूय** न० आत्मनो भावः भू—भावे क्यप् ६त०। आत्मत्वे ब्रह्मरूपे "आत्मभूयाय कल्पते" पुरा०।

**आत्ममय** त्रि० आत्मात्मकः आत्मन्+मयट्। आत्मस्वरूपापन्ने "सर्वमात्ममयं जगत्" पुरा० स्त्रियां ङीप्

**आत्ममानिन्** त्रि० आत्मानमुत्कर्षेण मन्यते मन—णिनि ६त०। १आत्मोत्कर्षाभिमानिनि गर्व्विते २सर्वभूतेषु आत्मत्वेन ज्ञातरि च स्त्रियां ङीप्।

**आत्ममूर्त्ति** पु० आत्मनोमूर्त्तिरिव मूर्त्तिरस्य। १भ्रातरि तस्य एकदेहोत्पन्नत्वेन, "भ्राता स्वोमूर्त्तिरात्मनः" इति मनुना भ्रातुः स्वतुल्यमूर्त्तित्वोक्तेस्य तथात्वम्। ६त०। वेदान्तिमते आत्मनः स्वरूपे २चैतन्यादौ न्यायमते ३कर्तृत्वादौ च स्त्री।

**आत्ममूली** स्त्री आत्मैव रक्षणे मूलमस्याः दुःस्पर्शत्वेनेतर मर्द्दनतः स्वस्य स्वयं रक्षणात् गौ०ङीष्। १दुरालभालतायाम्। आत्मा परमात्मा मूलं यस्य। २जगति न०। तस्यात्मप्रभवत्वात् तथात्वम् "ब्रह्म खानिलतेजांसि जलं भूश्चेति धातवः। इमे लोका एष चात्मा तस्माच्च सचराचरम्। मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः। हेममात्रमुपादाय रूप्यं वा हेमकारकः। निजलालासमायोगात् कोशं वा कोशकारकः। कारणान्येवमादाय तासुतास्विह योनिषु। सृजत्यात्मानमात्मा च संहृत्य करणानि च" या०स्मृतावात्मनो भूतसृष्टिमभिधाय अनतिदूरे "सहस्रात्मा मया योव आदिदेव उदाहृतः। मुखबाहूरुपज्जाःस्युस्तस्य वर्णा यथाक्रमम्। पृथिवी पादतस्तस्य शिरसोद्यौरजायत। नस्तःप्राणा दिशः" इत्युक्तेः जगतामात्ममूलत्वात्तथात्वम् "आत्ममूलमिदं सर्व्वमात्मन्येव प्रलीयते" इति पुरा०।

**आत्मम्भरि** त्रि० आत्मानं बिभर्त्ति भृ-खि मुम् च उप०स०। स्वोदरमात्रपूरके देवातिथ्यनादरणेन आत्मपोषकत्वात्तस्य तथात्वम् "आत्मम्भरिस्त्वं पिशितैर्नराणाम्" भट्टिः। "यथा तत्रात्मम्भरयोऽकल्याणाद्यासङ्गवत्त्वात् प्राणादयः न तथात्मम्भरिर्मुख्यः प्राणः किन्तर्हि सर्वार्थः, कथमित्युच्यते तेन मुख्येन यदश्नाति यत्पिबति लोकस्तेनाशितेन पीतेन चेतरान् प्राणादीन् प्रतिपालयति" छा०उ०भा०।

**आत्मयाजिन्** आत्मानं ब्रह्मरूपेण कर्म्मकरणादिकं भावयन् यजते यज—णिनि। "ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" इत्युक्तरूपभावनया ज्योतिष्टोमादिककर्म्मकर्त्तरि आरुरुक्षौ ब्रह्मनिष्ठे १कर्म्मयोगिनि "सर्व्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छतीति" मनूक्ते आत्मतया २सर्व्वभूतदर्शिनि च

**आत्मयोनि** पु० आत्मा योनिरस्य। १चतुर्मुखे ब्रह्मणि २शिवे ३मनोभवे "प्रहर्त्तुमभ्युद्यतमात्मयोनिम्" कुमा०। ४विष्णौ च "आत्मयोनिः स्वयं जाता" विष्णु स०। आत्मैव योनिरुपादानकारणं नान्यदिति" भाष्योक्तेः विष्णौ स्त्रीत्वमपि।

**आत्मरक्षा** स्त्री आत्मन एव रक्षा यस्याः। १इन्द्रवारुणीवृक्षे ६त०। आत्मनो रक्षा। २शास्त्रोक्ते विघ्नकर्त्तृभ्य आत्मनो रक्षणे च "आत्मरक्षायां जपे विनियोगः" सन्ध्याप्रयोगः।

**आत्मराम** पु० आत्मनि रमते संज्ञायां कर्त्तरि घञ्। आत्मज्ञानमात्रेण तृप्ते योगीन्द्रे।

**आत्मलाभ** पु० आत्मनोलाभः। आत्मनो यथास्वरूपज्ञानेन